श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ रत्नसामान्यपद्धतिः पञ्चदशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ रत्नसामान्यपद्धतिः पञ्चदशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

उदर्चिषस्ते रङ्गेन्द्रपादावनि ! बहिर्मणीन्।
अन्तर्मणिरवं श्रुत्वा मन्ये रोमाञ्चिताकृतीन्॥ १५.१ ॥

विधेहि शौरेर्मणिपादुके ! त्वं विपद्यमाने मयि रश्मिजालैः।
आसीदतामन्तककिङ्कराणां वित्रासनान् वेत्रलताविशेषान्॥ १५.२ ॥

मुकुन्दपादावनि ! मध्यनाड्या मूर्धन्यया निष्पततो मुमुक्षोः।
आब्रह्मलोकादवलम्बनार्थं रत्नानि ते रश्मिगणं सृजन्ति॥ १५.३ ॥

असूर्यभेद्यां रजनीं प्रजानाम् आलोकमात्रेण निवारयन्ती।
अमोघवृत्तिर्मणिपादरक्षे ! मुरद्विषो मूर्तिमती दया त्वम्॥ १५.४ ॥

रङ्गेशपादावनि ! तावकानां रत्नोपलानां द्युतयः स्फुरन्ति।
श्रेयःफलानां श्रुतिवल्लरीणाम् उपघ्नशाखा इव निर्व्यपायाः॥ १५.५ ॥

कस्यापि पुंसः कनकापगायाः पुण्ये सलीलं पुलिने शयाळोः।
समीपवृत्तिर्मणिपादुके ! त्वं संवाहयन्तीव पदं करैः स्वैः॥ १५.६ ॥

दिदृक्षमाणस्य परं निधानं स्नेहान्विते योगदशाविशेषे।
संवित्प्रदीपं मणिपादरक्षे ! सन्धुक्षयन्तीव मरीचयस्ते॥ १५.७ ॥

समाधिभाजां तनुते त्वदीया रङ्गेशपादावनि ! रत्नपङ्क्तिः।
स्थानं प्रयातुं तमसः परं तत् प्रदीपकृत्यं प्रभया महत्या॥ १५.८ ॥

बध्नासि रङ्गेश्वरपादरक्षे ! मन्ये यथार्हं मणिरश्मिजालैः।
सेवानतानां त्रिदशेश्वराणां शेषापटीं शेखरसन्निकृष्टाम्॥ १५.९ ॥

भजन्ति रङ्गेश्वरपादरक्षे ! प्रकल्पयन्तो विविधान् पुमर्थान्।
उदर्चिषश्चिन्तयतां जनानां चिन्तामणित्वं मणयस्त्वदीयाः॥ १५.१० ॥

नाथस्य दत्ते नदराजकन्या पातुं शुभान् पादनखेन्दुरश्मीन्।
मणिप्रभाभिः प्रतिपन्नपक्षां लीलाचकोरीमिव पादुके ! त्वाम्॥ १५.११ ॥

जनस्य रङ्गेश्वरपादुके ! त्वं जातानुकम्पा जनयस्ययत्नात्।
आकृष्य दूरान्मणिरश्मिजालैः अनन्यलक्ष्याणि विलोचनानि॥ १५.१२ ॥

रङ्गेशपादावनि ! तावकीनैः स्पृष्टाः कदाचिन्मणिरश्मिपाशैः।
कालस्य घोरं न भजन्ति भूयः कारागृहान्तेषु कशाभिघातम्॥ १५.१३ ॥

रत्नानि रङ्गेश्वरपादरक्षे ! त्वदाश्रितान्यप्रतिघैर्मयूखैः।
आसेदुषीणां श्रुतिसुन्दरीणां वितन्वते वर्णनिचोळलक्ष्मीम्॥ १५.१४ ॥

निद्रारसप्रणयिनो मणिपादरक्षे !
रङ्गेश्वरस्य सविधं प्रतिपद्यमाना।
शय्याफणीन्द्रमभितो भवती विधत्ते
रत्नांशुभिर्यवनिकामिव दर्शनीयाम्॥ १५.१५ ॥

सद्यस्त्वदुद्गहदशानमिताकृतीनां
स्रस्तांशुकं निजरुचा मणिपादुके ! त्वम्।
पद्मासहायपरिवारविलासिनीनां
पट्टांशुकैरिव पयोधरमावृणोषि॥ १५.१६ ॥

देवस्य रङ्गवसतेः पुरतः प्रवृत्ते-
रुद्धूतविश्वतिमिरां मणिरश्मिजालैः।
मन्ये मदीयहृदयायतनप्रवेश-
माङ्गल्यदीपकणिकां मणिपादुके ! त्वाम्॥ १५.१७ ॥

आकीर्णरत्ननिकरां मणिपादुके ! त्वां
रङ्गेश्वरस्य ललितां विपणिं प्रतीमः।

यत्संश्रयेण भवति स्थिरभक्तिमूल्यं
    कैवल्यमत्र जगतां क्रयविक्रयार्हम्॥ १५.१८ ॥

व्यङ्क्तुं क्षमं भगवतो जगदीश्वरत्वं
    वज्राङ्कुशध्वजसरोरुहचक्रचिह्नम्।
आश्लिष्य निर्भररुचिं मणिपादुके ! त्वाम्
    आसीदनाभरणसुन्दरमङ्घ्रिपद्मम्॥ १५.१९ ॥

रत्नप्रभापटलचक्रमनोहरा त्वं
    पद्मारुणं पदमिदं त्वयि रङ्गभर्तुः।
मन्ये तदेतदुभयं मणिपादरक्षे !
    चक्राब्जमण्डलमकिञ्चनरक्षणार्हम्॥ १५.२० ॥

त्रासात्स्वयं प्रणमतां दनुजेश्वराणां
    सङ्ख्येऽवलूनशिरसामपि मौळिरत्नैः।
आयोजयत्यनुकलं मणिपादुके ! त्वां
    सैरन्ध्रिकेव मुरवैरिकृपाणधारा॥ १५.२१ ॥

आस्कन्दनानि विबुधेन्द्रशिखामणीनां
    त्वामाश्रितान्यसुरसूदनपादरक्षे !।
रत्नानि ते स्तुतिसुवर्णपरीक्षणार्थे
    नूनं भजन्ति निकषोपलतां कवीनाम्॥ १५.२२ ॥

पादावनि ! प्रणयिनां प्रतिपादितार्थां
    क्रीडासरोजमिव शौरिपदं वहन्तीम्।
प्रत्युप्तरत्ननिकरप्रतिपन्नशोभां
    पश्यामि रोहणगिरेरधिदेवतां त्वाम्॥ १५.२३ ॥

यामेव रत्नकिरणैर्मणिपादरक्षे !
    चूडापदे तनुभृतां भवती विधत्ते।
शक्रादिदैवतशिखामणिरज्यमानैः
    तामेव ते प्रकटयन्ति पदैरभिख्याम्॥ १५.२४ ॥

रत्नाङ्कुरैरविरला मणिपादरक्षे !
    पाकोन्मुखैः परिगता पुरुषार्थसस्यैः।
देवेन रङ्गपतिना जगतां विभूत्यै
    केदारिकेव कृपया परिकल्पिता त्वम्॥ १५.२५ ॥

निर्धूतमोहतिमिरास्तव रत्नदीपैः
    निर्विश्यमानविभवं नदराजपुत्र्या।
प्रत्यक्षयन्ति निगमान्तनिगूढमर्थं
    पादावनि ! त्वयि निवेशितभावबन्धाः॥ १५.२६ ॥

रत्नोपलप्रकरसंभव एष दूराद्
    रङ्गाधिराजचरणावनि ! तावकीनः।
आर्द्रापराधपरिखिन्नधियां प्रजानाम्
    आश्वासनार्थ इव भाति करप्रसारः॥ १५.२७ ॥

व्यामुह्यतो विषयिबालमृगान् मदीयान्
    संसारघर्मजनितासु मरीचिकासु।
पादावनि ! प्रगुणरत्नमयूखजालैः
    आकृष्य विश्रमय केशवकान्तिसिन्धौ॥ १५.२८ ॥

अन्तर्निधाय मुनिभिः परिरक्ष्यमाणाम्
    आत्मीयरश्मिगुणितां मणिपादरक्षे !।
रङ्गेशपादकमलप्रतिपन्नमुद्रां
    नीवीमवैमि भवतीं निगमान्तवाचाम्॥ १५.२९ ॥

रामस्य रङ्गवसतेश्चरणानुषङ्गात्
    काष्ठां गतां भुवनपावनतां दधाना।
पादावनि ! प्रचुररत्नशिलानिबद्धा
    संसारसन्तरणसेतुरसि प्रजानाम्॥ १५.३० ॥

दिविषन्मकुटेषु सञ्चरन्त्याः प्रचुरस्ते मणिपादुके ! प्रकाशः।
दिवि रङ्गपतेर्महोत्सवार्थं वितता वन्दनमालिकेव भाति॥ १५.३१ ॥

प्रभवन्ति दवीयसां स्वभावात् तव रत्नानि मुकुन्दपादरक्षे !।
अयसामिव हन्त लोहकान्ताः कठिनानां मनसां विकर्षणाय॥ १५.३२ ॥

परिपश्यति देवि ! रङ्गनाथे रहसि त्वं सविधे निविश्य लक्ष्म्याः।
परिपुष्यसि रत्नधामभिः स्वैः अनसूयेव मनोज्ञमङ्गरागम्॥ १५.३३ ॥

तव रत्नकरार्पितं नवीनं परिगृह्य स्थिरमंशुकं मनोज्ञम्।
जरदंशुकवत्सुखेन देहं कृतिनः केशवपादुके ! त्यजन्ति॥ १५.३४ ॥

अभितो मणिपादुके ! निबद्धैः कृतसंस्कारविशेषमात्मरत्नैः।
कुरुते भवती पदं मुरारेः कठिनेऽस्मिन् हृदि मे निवेशयोग्यम्॥ १५.३५ ॥

निजरत्नकराञ्चलैर्मदीयान् अपराधानवधूय दत्तसाम्या।
रमया सहितस्य रङ्गभर्तुः पदयोरर्पय पादुके ! स्वयं माम्॥ १५.३६ ॥

रश्मिजालपरिवेषबन्धुरा रङ्गभूमिपतिरत्नपादुके !।
विश्वलोचनविहङ्गहारिणी वागुरेव वितता विराजसे॥ १५.३७ ॥

मानसाम्बुजविकासहेतुभिः सेविता मणिगणैः प्रभाकरैः।
पादुके ! वहसि सद्भिराश्रितां देवि ! विष्णुपदसम्पदं नवाम्॥ १५.३८ ॥

अधिशयितफणीश्वरस्य शौरेः स्वयमधिरूढपदोपधानपार्श्वा।
मणिवलयजुषा करेण मन्दं स्पृशसि पदावनि ! पादयोर्युगं तत्॥ १५.३९ ॥

भवत्यन्ते त्वां प्रणतस्य जन्तोः तदोकोऽग्रज्वलनं त्वत्प्रकाशैः।
यतो नाड्या मध्यमया विनिर्यन् गतिं विन्देत् केशवपादरक्षे !॥ १५.४० ॥

अशिथिलपरिणद्धा रश्मिजालैर्मणीनां
    दुरधिगमतमं नः पारमारोपयन्ती।
कमलनयनमाद्यं कर्णधारं दधाना
    भवसि भवपयोधेः पादुके ! पोतपात्री॥ १५.४१ ॥

मणिगणकिरणैस्ते कल्पिते गुल्मभेदे
    मृगयुरिव कुरङ्गीं त्वां पुरस्कृत्य भव्याम्।

हरति चरणरक्षे ! भक्तिपाशावरुद्धं
हृदयहरिणयूथं प्राणिनां रङ्गनाथः॥ १५.४२ ॥

परिचितपदमूला पादुके ! रङ्गिणस्त्वं
प्रभवति भुजमध्ये कौस्तुभोऽयं तथाऽपि।
भवति भृशमधस्तात् तेजसा भव्यभूम्ना
शलभितदुरितानां तावकानां मणीनाम्॥ १५.४३ ॥

कल्पश्रेणीदिनपरिणतौ जन्तुजाले प्रसुप्ते
विष्वग्व्याप्ते जगति तमसा पादुके ! तादृशेन।
स्त्यानालोकैस्तव मणिगणैर्वासगेहप्रदीपाः
सम्पद्यन्ते सह कमलया जागरूकस्य यूनः॥ १५.४४ ॥

श्रीरङ्गेन्दोश्चरणकमलद्वन्द्वसेवावलेपात्
आरूढायां त्वयि मखभुजामानतान् मौळिभागान्।
तेषां चूडामणिभिरनघैस्तावकानां मणीनां
केशाकेशि प्रभवति मिथस्त्रासलेशोज्झितानाम्॥ १५.४५ ॥

त्वद्रत्नोपलरश्मिपञ्जरतनुत्राणं स्थिरं बिभ्रतो
मातः ! माधवपादुके ! न तु पुनर्हस्तैः स्पृशन्त्याकुलैः।
दूरोत्सिक्तदुराढ्यजिह्मगबिलद्वाःपालकोपानल-
ज्वालामित्रकठोरवेत्रलतिकादत्तार्धचन्द्रं वपुः॥ १५.४६ ॥

संवर्तोदितसूर्यकोटिसदृशीं रङ्गेशपादावनि !
प्रस्तौषि प्रतियत्नरत्ननिकरज्योतिश्छटामुद्भटाम्।
तन्मन्ये तदनन्यसूरिपरिषन्मध्ये निवेशाय नः
तादृग्वासरसेऽपि भेत्तुमचिरादस्माकमन्धं तमः॥ १५.४७ ॥

सलीलं विन्यस्य त्वयि चरणरक्षे ! निजपदम्
यदृच्छानिष्क्रान्ते विहरति हरौ रङ्गरसिके।
दिशासौधानष्टौ जनयसि तदा निर्भरमिलन्
मणिच्छायामायाघनघटितकेतुव्यतिकरान्॥ १५.४८ ॥

महार्घैराश्लिष्टां मणिभिरवधूतद्युमणिभिः
　　कथञ्चित् क्षेत्रज्ञैरधिगतपदामम्ब ! भवतीम्।
मुकुन्देन त्रातुं पदकमलमूले विनिहितां
　　निराबाधां मन्ये निधिमनघवाचां निरवधिम्॥ १५.४९ ॥

तापत्रयं निरुन्धे पचति कषायान् विशोषयति पङ्कम्।
तेजस्त्रितयमिदं ते शङ्के रङ्गेन्द्रपादुके ! तेजः॥ १५.५० ॥

॥ इति श्रीपादुकासहस्रे रत्नसामान्यपद्धतिः पञ्चदशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥